श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः ।

ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥ ४.३९ ॥

śraddhāvāṁllabhate jñānaṁ tatparaḥ saṁyatendriyaḥ |
jñānaṁ labdhvā parāṁ śāntimacireṇādhigacchati || 4.39||

अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति ।

नायं लोकोऽस्ति न परो न सुखं संशयात्मनः ॥ ४.४० ॥

ajñaścāśraddadhānaśca saṁśayātmā vinaśyati |
nāyaṁ loko'sti na paro na sukhaṁ saṁśayātmanaḥ || 4.40||

योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयम् ।

आत्मवन्तं न कर्माणि निबध्नन्ति धनंजय ॥ ४.४१ ॥

yogasannyastakarmāṇaṁ jñānasañchinnasaṁśayam |
ātmavantaṁ na karmāṇi nibadhnanti dhanañjaya || 4.41||

तस्मादज्ञानसंभूतं हृत्स्थं ज्ञानासिनात्मनः ।

छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ॥ ४.४२ ॥

tasmādajñānasambhūtaṁ hṛtsthaṁ jñānāsinātmanaḥ |
chittvainaṁ saṁśayaṁ yogamātiṣṭhottiṣṭha bhārata || 4.42||

ॐ तत्सदिति श्रीमद् भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे

श्रीकृष्णार्जुनसंवादे ज्ञानकर्मसंन्यासयोगो नाम चतुर्थोऽध्यायः

om tatsaditi śrīmad bhagavadgītāsūpaniṣatsu
brahmavidyāyāṁ yogaśāstre śrīkṛṣṇārjunasaṁvāde
jñānakarmasannyāsayogo nāma caturtho'dhyāyaḥ